# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल–२०१६

**कक्षा** - आचार्य-२ ( **Sem_4** ) **प्रश्नपत्र-५** **गुणाः** - ७०

**विषयः** - धर्मशास्त्रम् CE 5.4.4 **समयः** - ०३:०० तः ०६:००

**दिनाङ्कः** - 22/04/2016 **सन्दर्भग्रन्थः** - विदूरनीतिः

---

**युनिट-१**

**प्रश्न-१** **निम्नलिखितयोः पद्ययोः एकस्य सन्दर्भं दत्त्वा व्याख्या कार्या ।** ०४

१. जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि ।
   तद् ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥

२. शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् ।
   अपृष्टस्तस्य तद् ब्रूयात् यस्यनेच्छेत् पराभवमङ्ग ॥

**प्रश्न-२** **एकस्य विवेचनं गुरुत ।** १२

१. पण्डितलक्षणानि विवृणुत ।

२. नीतिविवेचनं कुरुत ।

**प्रश्न-३** **अधोलिखितेषु द्वयोः उत्तरं लिखत ।** ०४

१. कमाहुर्मूढचेतसम् ।

२. कानि चत्वारि गृहे वसन्तु?

**युनिट-२**

**प्रश्न-४** **ससन्दर्भं व्याख्यायताम् ।** ०४

सर्वतीर्थेषु वा स्थानम् सर्वभूतेषु चार्जवम् ।
उभे त्वेते समे स्यातामार्जवं वा विशिष्यते ॥

अथवा

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥

**प्रश्न-५** **विदुरनीतेः तृतीयाध्यायस्य सारांशो लेख्यः ।** ०८

**अथवा**

**महाकुललक्षणानि हिताकारिणी वचनानि च - विवेचयत ।**

**प्रश्न-६ अधोलिखितेषु त्रयाणामतिलघूत्तराणि लेख्यानि । ०३**

१. कस्य सर्वार्थाः सिद्ध्यन्ते?

२. धर्मस्य मार्गाः कतिप्रकारकाः?

३. अष्टौ गुणाः कं दीपयन्ति?

४. उत्तमपुरुषः कः?

५. मुमुक्षवः कथं विचरन्ति?

## युनिट-३

**प्रश्न-७ कस्यचिदेकस्य श्लोकस्य संस्कृते ससन्दर्भं व्याख्या कार्या । ०४**

१. सुलभाः पुरुषाः राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता-श्रोता च दुर्लभः ॥

२. यो धर्ममर्थं कामं च यथाकालं विषेवते ।
धर्मार्थकामसंयोगं सोऽमुत्रेह च विन्दति ॥

**प्रश्न-८ एकस्य निबन्धो लेख्यः । ( विदुरनीतिदृष्ट्या ) ०८**

१. मूर्खगणना ।

२. भिक्षुकतापसलक्षणानि ।

**प्रश्न-९ अतिलघूत्तराणि लेख्यानि । ( त्रयाणामेव ) ०३**

१. किमर्थं पृथिवीं त्यजेत्?

२. कं सततं रक्षेत्?

३. समिधः श्रियः कति?

४. बुद्धिमान् किं न सेवेत?

५. कीदृशः पुरुषः भ्रंश्यते?

## युनिट-४

**प्रश्न-१० प्रदत्तयोः एकस्य ससन्दर्भं व्याख्या कार्या । ०४**

१. प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रमूलबलेनान्यो यः प्रियः प्रिय एव सः ॥

२. दुःखार्तेषु प्रमत्तेषु नास्तिकेष्वलसेषु च ।
न श्रीवसत्यदान्तेषु ये चोत्साहविवर्जिताः ॥

**प्रश्न-११ अधोलिखिते विषये स्वाभिमतं यथाशास्त्रं प्रतिपादयत । १२**

१. विद्यार्थिनां गुणदोषाः ।

२. चातुर्वर्ण्यधर्माः ।

**प्रश्न-१२ अतिलघूत्तरं देयम् । ( द्वयोः ) ०४**

१. विद्यार्थिनां सप्तदोषाः के?

२. केषां सङ्गतिः त्याज्या?

३. कः अनन्त्यसुखमश्नुते?